श्री शिव नवरत्न स्तवः

श्री शिव नवरत्न स्तवः

बृहस्पतिरुवाच |
नमो हराय देवाय महामाया त्रिशूलिने |
तापसाय महेशाय तत्त्वज्ञानप्रदायिने || 1 ||

नमो मौंजाय शुद्धाय नमः कारुण्यमूर्तये |
नमो देवाधिदेवाय नमो वेदांतदायिने || 2 ||

नमः पराय रुद्राय सुपाराय नमो नमः |
विश्वमूर्ते महेशाय विश्वाधाराय ते नमः || 3 ||

नमो भक्तभवच्छेदकारणायाऽमलात्मने |
कालकालाय कालाय कालातीताय ते नमः || 4 ||

जितेंद्रियाय नित्याय जितक्रोधाय ते नमः |
नमः पाषंडभंगाय नमः पापहराय ते || 5 ||

नमः पर्वतराजेंद्रकन्यकापतये नमः |
योगानंदाय योगाय योगिनां पतये नमः || 6 ||

प्राणायामपराणां तु प्राणरक्षाय ते नमः |
मूलाधारे प्रविष्टाय मूलदीपात्मने नमः || 7 ||

नाभिकंदे प्रविष्टाय नमो हृद्देशवर्तिने |
सच्चिदानंदपूर्णाय नमः साक्षात्परात्मने || 8 ||

नमः शिवायाद्भुतविक्रमाय ते
नमः शिवायाद्भुतविग्रहाय ते |
नमः शिवायाखिलनायकाय ते
नमः शिवायामृतहेतवे नमः || 9 ||

सूत उवाच |
य इदं पठते नित्यं स्तोत्रं भक्त्या सुसंयुतः |
तस्य मुक्तिः करस्था स्याच्छंकरप्रियकारणात् || 10 ||

विद्यार्थी लभते विद्यां विवाहार्थी गृही भवेत् |
वैराग्यकामो लभते वैराग्यं भवतारकं || 11 ||

तस्माद्दिने दिने यूयमिदं स्तोत्रं समाहिताः |
पठंतु भवनाशार्थमिदं वो भवनाशनं || 12 ||

इति श्रीस्कांदे महापुराणे सूतसंहितायां बृहस्पतिकृत शिव नवरत्न स्तवः ||